साहित्यम् - तृतीय - पत्रम् - उपशास्त्री - प्रथम - खण्ड

काव्यदीपिका

Saathi

Date ___/___/______

प्र० ① ध्वन्यादि काव्यस्य भेदोपभेदाश्च लिखत ?

उत्तरम् → ध्वनिर्गुणीभूतव्यंग्यं चित्रमिति त्रिधा ।

ध्वनिं लक्षयति विश्वनाथ – "वाच्यातिशायिनि व्यंग्ये ये ध्वनिस्तत्काव्यमुत्तमम् ।"

यस्मिन् काव्ये व्यंग्यार्थो वाच्यार्थादधिकचमत्कारी, तन्नाम ध्वनिः तच्च उत्तमं काव्यम् ।

ध्वनि भेदः — " भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ।।"

लक्षणामूलाभिधामूलौ (अविवक्षितवाच्यविवक्षितान्य परवाच्यौ)। लक्षणामूलाभिधामूलश्चेति ध्वनेर्द्वौ भेदौ, तौ च क्रमेण अविवक्षितवाच्यः विवक्षितवाचो नाम लक्षणामूलो ध्वनिः लक्षणामूलत्वादेवात्र वाच्यमविवक्षितम् ।

अविवक्षितवाच्यस्य भेदानाह – स च द्विविधः अर्थान्तरसंक्रमितवाच्य अत्यन्ततिरस्कृतवाच्यश्च । यदाह विश्वनाथः —

" अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्विविधमृच्छति ।।"

अर्थान्तरसंक्रमितवाच्यमाह – यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपे अर्थान्तरे परिणमति, तत्र मुख्यार्थस्य स्वविशेषरूपेऽर्थान्तरे संक्रमितत्वादर्थान्तरसङ्क्रमितवाच्यम् । यथा —

" त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमात्र विधेहि तत् ।।"

अत्र वचनादि उपदेशादिरूपतया परिणमति, सम्बोध्य आत्मीय भावात्यतिशयश्च व्यंग्यः ।

Renu Devi
28/05/20

राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया ।

Page No. ___

उपशास्त्री साहित्यम् - तृतीय-पत्रम्
द्वितीय-खण्ड काव्यदीपिका

Date __/__/____

प्र० (1) प्रस्तावना रूपम् लिखत ?

उत्तरम् → नटी विदूषको वापि पारिपार्श्वक एव वा
सूत्रधारेण सहिता संलापं यत्र कुर्वते ।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥

प्र० (2) → श्रव्यकाव्यस्य लक्षणं लिखत् ।

उत्तरम् → श्रव्य श्रोतव्यमात्रं तत् परिकीर्तितम् ।
पद्यं गद्यञ्च मिश्रञ्च पद्यं चतुष्पदी मतम् ।
जाति वृत्तामिति द्वेधा जातिर्मात्राकृतेन तत् ।
वृत्तमक्षर संख्यातं पद्यनैकेन मुक्तकम् ॥
द्वाभ्यान्तु युग्मकं ज्ञेयं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम् ॥

पद्यमयस्य महाकाव्यस्य लक्षणमुक्तं काव्यादर्शे —
सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम् ॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्ग फलोपेतं चतुरोदात्त नायकम् ॥
नगरार्णवशैलर्तुचन्द्रसूर्योऽऽदिवर्णनैः ।
अलङ्कृतम संक्षिप्तरस भावनिरन्तरम् ॥
सर्गैरनाति विस्तीर्णैः श्रव्य वृत्तैः सुसन्धिभिः ।
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ॥
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः ।

यथा – रामायण, रघुवंश, शिशुपालवध, नैषधीयचरिता-
ऽऽदयः ।

राधा उमाकान्त सं० महावि०
सुखसेना पूर्णिया ।

Renu Devi
28/05/20

Page No.

शास्त्री साहित्यम् - अभिज्ञानशाकुन्तलम्
प्रथम - खण्ड
महत्त्वपूर्णाः लघूत्तरीयाणि प्रश्नोत्तराणि

Saathi

Date __ /__ /__

प्र० (1) नाटकस्य किं लक्षणम् ?

उत्तरम् → नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । इयं लक्षणमुक्तं साहित्यदर्पणे ।

प्र० (2) ... शकुन्तलायाः लाभे सन्दिहानो राजा किं चिन्तयति ?

उत्तरम् → शकुन्तलायाः लोकोत्तरं लावण्यं सञ्चिन्त्य तल्लाभे सन्दिहानो राजा दुष्यन्तो नर्मसचिवं विदूषकं प्रति कथयति —

अनाघ्रातं पुष्पं किशलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

प्र० (3) सुरयुवतयः कुत्र विजयम् आशंसन्ते ?

उत्तर → दैत्यैः बद्धवैराः सुरयुवतयः दुष्यन्तस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयं आशंसन्ते ।

प्र० (4) 'परिहासविजल्पितं सखे' इति राजा कथं कथयति ?

उत्तरम् → शकुन्तलाविषयकमनुरागं प्रच्छादयन् तस्याः स्वाभिलाषानर्हत्वं च समर्थन् राजा दुष्यन्तो विदूषकं ब्रूते —

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥

प्र० (5) विष्कम्भकस्य किं लक्षणम् ?

उत्तरम् → वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥

प्र० (6) राजा दुष्यन्तः कथं विघ्नानपोहति ?

उत्तरम् — राजा दुष्यन्तः धनुषः हुङ्कारेणैव विघ्नानपोहति ।

Renu Devi
राधा रमाकान्त सं० महावि० 28/05/20
सुरवसेना, पूर्णिया ।

Page No. ____

शास्त्री — साहित्यम्
द्वितीय-खण्ड — मेघदूतम्

Saathi

Date ___/___/___

प्र० (1) महाकवि कालिदास प्रणीते मेघदूते प्रकृति चित्रणम् वर्णनीयः।

उत्तरम् – मेघदूतं नाम प्रकृति प्रधानं खण्डकाव्यम्। अत्र प्रारम्भतोऽन्तं यावत् प्रकृति वर्णनमेवास्ति। महाकविना कालिदासेन मेघदूते उद्दीपनाऽऽलम्बनेति द्विविधायाः प्रकृतेर्वर्णनं विहितम्। तत्र वन-पर्वत नद्यादयः सन्ध्याधारा आलम्बनेति द्विविधायाः प्रकृतेः
एकतस्तु कालिदासो "धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः" इत्युक्त्वा मेघं धूमाग्निजलवायूनां समुदायरूपं मनुते, अन्यतश्च सः मेघं वियोगोद्दीपकत्वेन वर्णयति। तथाहि–

"मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः।
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥"

यद्यपि स यक्षोऽष्टौ मासान् रामगिर्याश्रमेषु यापितवान्, किन्तु आषाढस्य प्रथमदिवसे यदा सः आश्लिष्टसानु मेघं ददर्श तदा तत्प्रियावियोगजन्यं दुःखमत्यधिकमुद्दीप्तं जातम्। तथा चाभिलाषोत्पत्तिकारणस्य तस्य पुरः कथमपि किञ्चित्कालं स्थित्वाऽन्तर्बाष्पं दधान। यक्षस्य हृद्येवमासीत् यत् मेघो यथा-मामुद्दीपयति तथैव यदि मम प्रियामप्युद्दीपयेत्तदाऽवश्यमेव सा न भविष्यतीति वनिता जीविताल्म्बनार्थी सः स्वपत्नीं प्रति स्वकुशलवृत्तं तदाश्वासनवचनं वा प्रेषयितुमतीवोत्सुकः सञ्जातः।
सः कामार्तः सन् चेतनाचेतनविवेकशून्यो जातः, अत एव सन्देश-प्रेषणार्थं मेघमुक्तवान्–

"संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः,
संदेशं मे हर धनपति क्रोधविश्लेषितस्य।" इति।

मेघो न स्याच्चेत् यक्षवियोगोद्दीपनम्, सन्देशार्थं प्रार्थना मेघस्य दौत्यं किमपि न स्यात्, अतः मेघदूतम् मेघस्योद्दीपनविलास इति वक्तुं युज्यते।

Renu Devi
28/05/2020

राधा उमाकान्त सं० महावि०
भरकोना प्रणिया

Page ___